तत्र शक्तिपदार्थं निरूपयद्भिः तार्किकैरभिहितम्—'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्याकारा इदं पदमिममर्थं बोधयतु इत्याकारावेश्वरेच्छा शक्तिर्लाघवात्। सैव सङ्केतसम्बन्धः। यद्यपि शक्तेः विषयत्वरूपः सम्बन्धः पदे, अर्थे, बोधे चापि भवति तथापि बोधनिष्ठजन्यतानिरूपितजनकत्वरूपे शक्तेर्विषयो वाचक एव। पदजन्यबोधविषयवत्त्वरूपेण च शक्तेर्विषयो वाच्यो भवति इति नातिप्रसङ्गः।

यद्यपि सर्वप्रथमं शक्तिग्रहो वाक्य एव भवति तथापि अवापोद्वापाभ्यां शास्त्रकृतकल्पिताभ्यां तत्तत्पदशक्तिग्रहः' इति।

परञ्चेदं मतं नैयायिकानां वैयाकरणैर्न हि स्वीक्रियते—इच्छायाः सम्बन्धिनोराश्रयतानियामकत्वाभावेन सम्बन्धत्वासम्भवात्। सम्बन्धो हि—सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः इत्यभियुक्तव्यवहारात्। यथा घटवद् भूतलमित्यादौ संयोगरूपः सम्बन्धः, सम्बन्धिभ्यां भिन्नः द्विष्ठः घटनिरूपितसंयोगाश्रयः भूतलमिति विशिष्टबुद्धिनियामकश्च भवति। नात्र तथा घटशब्दः इच्छावान् तदर्थो वा इच्छावान् इति व्यवहारः।

तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः। सा च वाच्यवाचकभावापरपर्यायरूपा। तद्ग्राहकञ्च इतरेतराध्यासमूलकं तादात्म्यम्, तदेव सम्बन्धः। तादात्म्यस्य सम्बन्धत्वं च रूपीघटः, जातिमान् पटः इत्यादौ आश्रयताबुद्धिनियामकत्वात् प्रसिद्धम्। भेदाभेदघटितमिदमेव नैयायिकैः समवायशब्देनाभिधीयते। उभयनिरूपिततादात्म्यवानुभय इत्यर्थपदयोः व्यवहारत्। यतः सम्बन्धेनैव नियमिता शक्तिकार्यं जनयति। दृश्यते चापि लोके—दीपादिगतप्रकाशकत्व शक्तावपि आलोकविषयसम्बन्धे सत्येव प्रकाशकत्वमिति। उक्तञ्चापि हरिणा—

'उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।
शक्तीनामप्यसौ शक्तिः गुणानामप्यसौ गुणः॥' इति॥

अयमाशयो यत्—यत्र उपकारस्वभावः सम्बन्धोऽस्ति तत्र शक्त्याख्यो धर्मं अनुमीयते। असम्बद्धानाम् उपकाराभावात्। न च शक्तिरेव सम्बन्धः शक्तीनामपि आधारपारतन्त्रे कार्यजनने च सम्बन्धस्यैव नियामकत्वात्।

स च सम्बन्धः पदे वाक्ये चापि भवति। तथा चाह न्यायभाष्यकारः—'समयज्ञानार्थं चेदं पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणम्, वाक्यलक्षणाया

Scanned with CamScanner